पञ्चदशः पाठः

लालनगीतम्

उदिते सूर्ये धरणी विहसति ।
पक्षी कूजति कमलं विकसति ।।1।।

नदति मन्दिरे उच्चैर्ढक्का ।
सरितः सलिले सेलति नौका ।।2।।

पुष्पे पुष्पे नानारङ्गाः ।
तेषु डयन्ते चित्रपतङ्गाः ।।3।।

वृक्षे वृक्षे नूतनपत्रम् ।
विविधैर्वर्णैर्विभाति चित्रम् ।।4।।

धेनुः प्रातर्यच्छति दुग्धम् ।
शुद्धं स्वच्छं मधुरं स्निग्धम् ।।5।।

गहने विपिने व्याघ्रो गर्जति ।
उच्चैस्तत्र च सिंहः नर्दति ।।6।।

हरिणोऽयं खादति नवघासम् ।
सर्वत्र च पश्यति सविलासम् ।।7।।

उष्ट्रः तुङ्गः मन्दं गच्छति ।
पृष्ठे प्रचुरं भारं निवहति ।।8।।

घोटकराजः क्षिप्रं धावति ।
धावनसमये किमपि न खादति ।।9।।

पश्यत भल्लुकमिमं करालम् ।
नृत्यति थथथै कुरु करतालम् ।।10।।

–सम्पदानन्दमिश्रः

© NCERT not to be republished

शब्दार्थाः

उदिते	–	उगने पर, निकलने पर	on the rise
नदति	–	आवाज/ध्वनि करता है	rings
उच्चैः	–	ऊँची आवाज में, जोर से	loudly
ढक्का	–	नगाड़ा	drum
सेलति	–	डगमगाती है, हिलती डुलती है	shakes
डयन्ते	–	उड़ते हैं	fly
चित्रपतङ्गाः	–	तितलियाँ	butterflies
वर्णैः	–	रंगो से	with colours
विभाति	–	सुशोभित होता है	shines
स्निग्धम्	–	मुलायम, चिकना	soft
गहने	–	घने	dense
विपिने	–	जंगल में	in forest
नर्दति	–	दहाड़ता है	roars
तुङ्गः	–	ऊँचा	lofty, high
निवहति	–	ढोता है	carries
क्षिप्रम्	–	जल्दी से, तेजी से	swiftly
भल्लुकः	–	भालू	bear
करालम्	–	भयानक	ferocious
करतालम्	–	ताली	clapping

© NCERT not to be republished



1. **गीतम् सस्वरं गायत।**

2. **एकपदेन उत्तरत-**

(क) का विहसति?

(ख) किम् विकसति?

(ग) व्याघ्रः कुत्र गर्जति?

(घ) हरिणः किं खादति?

(ङ) मन्दं कः गच्छति?

3. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) सलिले नौका सेलति।

(ख) पुष्पेषु चित्रपतङ्गाः डयन्ते।

(ग) उष्ट्रः पृष्ठे भारं वहति।

(घ) धावनसमये अश्वः किमपि न खादति।

(ङ) सूर्ये उदिते धरणी विहसति।

4. **मञ्जूषातः समानार्थकपदानि चित्वा लिखत-**

पृथिवी	देवालये	जले	वने	मृगः	भयङ्करम्

धरणी	....	विपिने	....
करालम्	....	हरिणः	....
सलिले	....	मन्दिरे	....

© NCERT not to be republished

5. विलोमपदानि मेलयत-

मन्दम्	नूतनम्
नीचैः	स्निग्धम्
कठोरः	पर्याप्तम्
पुरातनम्	उच्चैः
अपर्याप्तम्	क्षिप्रम्

6. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत-

(क) धावनसमये अश्वः खादति। ☐

(ख) उष्ट्रः पृष्ठे भारं न वहति। ☐

(ग) सिंहः नीचैः क्रोशति। ☐

(घ) पुष्पेषु चित्रपतङ्गाः डयन्ते। ☐

(ङ) वने व्याघ्रः गर्जति। ☐

(च) हरिणः नवघासम् न खादति। ☐

7. अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत-

यथा- चित्रपतङ्गः	(प्रथमा-बहुवचने)	-	चित्रपतङ्गाः
भल्लुकः	(तृतीया-एकवचने)	-	....
उष्ट्रः	(पञ्चमी-द्विवचने)	-	....
हरिणः	(सप्तमी-बहुवचने)	-	....
व्याघ्रः	(द्वितीया-एकवचने)	-	....
घोटकराजः	(सम्बोधन-एकवचने)	-	....

© NCERT not to be republished

8. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत–

खगाः	विकसन्ति	कमलानि	उदेति	क्रीडन्ति
डयन्ते	सूर्यः	चित्रपतङ्गाः	कूजन्ति	बालाः

....

....

....

....

....

© NCERT not to be republished